# Shri Vanaragita from ParasharasamhitA

# શ્રીવાનરગીતા શ્રીપરાશરસંહિતાયામ્

## Document Information

Text title : vAnaragItA

File name : vAnaragItA.itx

Category : gItA, giitaa, hanumaana

Location : doc_giitaa

Transliterated by : Pranav Tendulkar, PSA Easwaran

Proofread by : Vrushali Agarkar, PSA Easwaran

Description-comments : parAsharasaMhitA maitreyaparAsharasaMvAde hanumanmAhAtmyavarNanaM nAma paMchaviMsho.adhyAyaH

Latest update : July 17, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીવાનરગીતા શ્રીપરાશરસંહિતાયામ્

શ્રીપરાશર ઉવાચ ।
શ઼ૃણુ મૈત્રેય વિપ્રર્ષે સ્તોત્રં શ્રીહનુમત્પરમ્ ।
કૃતં સર્વવાનરૈશ્ચ શ્રીવાનરગીતાભિદમ્ ॥

સ્તોત્રં સર્વોત્તમં ચૈવ હનુમત્તત્ત્વદર્શનમ્ ।
સર્વમાયહરં ચૈવ આધિવ્યાધિવિનાશનમ્ ॥

અગસ્ત્યેન પુરા પ્રોક્તં સર્વેષાં મુનિસન્નિધૌ ।
ઇન્દ્રેણ યાચિતં ચૈતત્ લોકોપકરણેચ્છયા ॥

ઇન્દ્રોઽથ પરિપપ્રચ્છ સત્કૃતં મુનિપુઙ્ગવમ્ ।
અગસ્ત્યં ચ મહાત્માનં આસીનં ચ સુખાસને ॥

દેવદેવ ભવામ્ભોધેઃ દુસ્તરાત્કલુષેન્દ્રિયાઃ ।
જનાઃ કથં તરન્તીહ તન્મે વદ કૃપાનિધે ॥

શ્રી અગસ્ત્ય ઉવાચ ।
હનૂમન્તં કૃતસ્તોત્રં વાનરૈર્વિમલાત્મભિઃ ।
પઠન્તિ યે સદા મર્ત્યાઃ તચ્ચિત્તવિમલાત્મકાઃ ॥

તરન્તિ ભવપાદોધિં પ્રાપ્નુવન્તિ હરેઃ પદમ્ ।
આયુઃ કીર્તિર્યશશ્ચૈવ લભન્તે નાત્ર સંશયઃ ॥

ૐ અસ્ય શ્રીવાનરગીતાસ્તોત્રમન્ત્રસ્ય - અગસ્ત્ય ઋષિઃ
જગતી છન્દઃ - શ્રીહનુમાન્ દેવતા - મારુતાત્મજ ઇતિ બીજં -
અઞ્જનાસૂનુરિતિ શક્તિઃ - વાયુપુત્ર ઇતિ કીલકં -
શ્રીહનુમત્પ્રસાદસિધ્યર્થે વિનિયોગઃ ॥

ધ્યાનમ્ ।
વામે જાનુનિ વામજાનુમપરં જ્ઞાનાખ્યમુદ્રાન્વિતં
હૃદ્દેશે કલયન્નુતો મુનિગણૈરધ્યાત્મદક્ષેક્ષણઃ ।

આસીનઃ કદલીવને મણિમયે બાલાર્કકોટિપ્રભઃ
ધ્યાયન્ બ્રહ્મ પરં કરોતુ મનસા શુદ્ધિં હનૂમાન્ મમ ॥

સઞ્જીવ પર્વતોદ્ધાર મનોદુઃખં નિવારય ।
પ્રસીદ સુમહાબાહો ત્રાયસ્વ હરિસત્તમ ॥

શ્રીસુગ્રીવ ઉવાચ ।
સુવર્ણશૈલસ્ય ગવાં ચ કોટિશતસ્ય કોટેશ્ચ શતસ્ય યત્ફલમ્ ।
દાનસ્ય નૈવાસ્તિ સમં ફલં ચ ધ્રુવં ચ તન્મારુતિદર્શનેન ॥ ૧॥

શ્રીગન્ધમાદનઃ ઉવાચ ।
હનુમન્નિતિ મે સ્નાનં હનુમન્નિતિ મે જપઃ ।
હનુમન્નિતિ મે ધ્યાનં હનુમત્કીર્તનં સદા ॥ ૨॥

શ્રીસુષેણ ઉવાચ ।
રામભક્તચરિતકથામૃતં વાયુતનયગુણાનુકીર્તનમ્ ।
રામદાસ તવ પાદસેવનં સમ્ભવન્તુ મમ જન્મજન્મનિ ॥ ૩॥

શ્રી અઙ્ગદ ઉવાચ ।
માતા સુવર્ચલાદેવી પિતા મે વાયુનન્દનઃ ।
બાન્ધવા હનુમદ્ભક્તાઃ સ્વદેશો ભુવનત્રયમ્ ॥ ૪॥

શ્રીનીલ ઉવાચ ।
ભક્તકલ્પતરું સૌમ્યં લોકોત્તરગુણાકરમ્ ।
સુવર્ચલાપતિં વન્દે મારુતિં વરદં સદા ॥ ૫॥

શ્રીગવાક્ષ ઉવાચ ।
વાયુપુત્રેણ મહતા યદ્યદુક્તં કરોમિ તત્ ।
ન જાનામિ તતો ધર્મં મદ્ધર્મં રક્ષ માં સદા ॥ ૬॥

શ્રીમૈન્દ ઉવાચ ।
સમીરસૂતે સતતં ત્વદાજ્ઞયા ત્વદંશકઃ પ્રેરિતમાનસેન્દ્રિયઃ ।
કરોમ્યહં યચ્ચ શુભાશુભં પ્રભો ત્વત્પ્રીતયે મત્કૃતમસ્તુ તત્સદા ॥ ૭॥

શ્રીદ્વિવિદ ઉવાચ ।
રામાદીનાં રણે ખ્યાતિં દાતું યો રાવણાદિકાન્ ।
નાવધીત્સ્વયમેવૈકસ્તં વન્દે હનુમત્પ્રભુમ્ ॥ ૮॥

શ્રીશરભ ઉવાચ ।

ભૌમસ્ય વાસરે પૂજા કર્તવ્યા હનુમત્પ્રભોઃ ।
ભવેત્સઃ શુચિરાયુઃ શ્રીઃ પુત્રમિત્રકલત્રવાન્ ॥ ૯॥

શ્રીગવયઃ
આમિષીકૃતમાર્તાણ્ડં ગોષ્પદીકૃતસાગરમ્ ।
તૃણીકૃતદશગ્રીવં આઞ્જનેયં નમામ્યહમ્ ॥ ૧૦॥

શ્રીપ્રહસ્તઃ
ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં યશ્શોકવહ્નિં જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ૧૧॥

શ્રીનલ ઉવાચ ।
નમામ્યહં વાયુજપાદપઙ્કજં કરોમિ તદ્વાયુજપૂજનં સદા ।
વદામિ વાતાત્મજનામ મઙ્ગલં સ્મરામિ વાયૂદ્ભવકીર્તનં શુભમ્ ॥ ૧૨॥

શ્રીધર્મક ઉવાચ ।
સપ્તષષ્ટિર્હતાન્ કોટિવાનરાણાં તરસ્વિનામ્ ।
યઃ સઞ્જીવનયામાસ તં વન્દે મારુતાત્મજમ્ ॥ ૧૩॥

શ્રીગજ ઉવાચ ।
તનૌ બાલપાશઃ પિતા પાર્વતીશઃ
　　સ્ફુરદ્બાહુદણ્ડો મુખે વજ્રદંષ્ટ્રઃ ।
સતી ચાઞ્જના યસ્ય માતા તતોઽન્યં
　　ન જાને ન જાને ન જાને ન જાને ॥ ૧૪॥

શ્રીઋક્ષરાજ ઉવાચ ।
બુદ્ધિર્બલં યશો ધૈર્યં નિર્ભયત્વમરોગતા ।
અજાડ્યં વાક્પટુત્વં ચ હનુમત્સ્મરણાદ્ભવેત્ ॥ ૧૫॥

શ્રીસમ્પાતિરુવાચ ।
નાશકં સીતાશોકસ્ય શ્રીરામાનન્દદાયિનમ્ ।
સુખપ્રદં સાધકાનાં વાયુપુત્રં નમામ્યહમ્ ॥ ૧૬॥

શ્રીવેગવાનુવાચ ।
અઞ્જનાવરપુત્રાય રામેષ્ટાય હનૂમતે ।
સર્વલોકૈકવીરાય બ્રહ્મરૂપાય તે નમઃ ॥ ૧૭॥

શ્રીરુદ્રગ્રીવ ઉવાચ ।

હનૂમત્સદૃશં દૈવં નાસ્તિ નાસ્તીતિ ભૂતલે ।
તં પૂજયન્તિ સતતં બ્રહ્મા-ગૌરી-મહેશ્વરાઃ ॥ ૧૮॥

શ્રીદધિમુખઃ
આલોડ્ય વેદશાસ્ત્રાણિ સર્વાણ્યપિ મહર્ષિભિઃ ।
ઇદમેકં સુનિર્ણીતં ન દૈવં હનુમત્પરમ્ ॥ ૧૯॥

શ્રીસુદંષ્ટ્ર ઉવાચ ।
મઙ્ગલં હનુમન્નિત્યં મઙ્ગલં કપિપુઙ્ગવ ।
મઙ્ગલં ચાઞ્જનાસૂનો મઙ્ગલં રાઘવપ્રિય ॥ ૨૦॥

શ્રીઋષભ ઉવાચ ।
કરુણારસપૂર્ણાય જગદાનન્દહેતવે ।
કુક્ષિસ્થાખિલલોકાય હનૂમદ્બ્રહ્મણે નમઃ ॥ ૨૧॥

શ્રીપૃથુરુવાચ ।
દાતા દાપયિતા ચૈવ સંહર્તા રક્ષકસ્તથા ।
પ્રેરકશ્ચાનુમોદકશ્ચ કર્તા ભોક્તા કપીશ્વરઃ ॥ ૨૨॥

શ્રીજામ્બવાન્ ઉવાચ ।
ભુક્તિમુક્તિપ્રદં નામ વિહાય હનુમન્ તવ ।
સંસરન્તિ જના મૂઢાઃ કિં વિચિત્રમતઃપરમ્ ॥ ૨૩॥

શ્રીજ્યોતિર્મુખ ઉવાચ ।
મત્પ્રાર્થનાફલમિદં મમ જન્મનશ્ચ
　　નેચ્છામિ કિઞ્ચિદપરં હનુમન્ મહાત્મન્ ।
ત્વદ્દાસદાસજનપાદરજોનિકેત
　　મસ્મદ્ધિતો ભવતુ સેવકપારિજાત ॥ ૨૪॥

શ્રીસુમુખ ઉવાચ ।
રસને રસસારજ્ઞે મધુરાસ્વાદકાઙ્ક્ષિણિ ।
હનુમન્નામપીયૂષં સર્વદા રસને પિબ ॥ ૨૫॥

શ્રીગોલાઙ્ગૂલ ઉવાચ ।
કુતો દુર્દિનં વા કુતો ભૌમવારઃ
　　કુતો વૈધૃતિસ્તસ્ય ભદ્રા કથં વા ।
કુતો વા વ્યતીપાતદોષક્ષુતં વા

હનૂમત્પદધ્યાનવીતાશુભસ્ય ॥ ૨૬॥

શ્રીકુમુદ ઉવાચ ।
ત્રાતારો ભુવિ પાદાશ્ચ માર્ગાશ્ચ રસને તવ ।
હનૂમન્નિર્મિતાસ્સન્તિ જનાનાં હીનતા કુતઃ ॥ ૨૭॥

શ્રીશતબલિરુવાચ ।
ધન્યોસ્મ્યનુગૃહીતોઽસ્મિ પુણ્યોઽસ્મિ મહિતોઽસ્મ્યહમ્ ।
હનુમન્ ત્વત્પદામ્ભોજસેવાવિભવયોગતઃ ॥ ૨૮॥

શ્રીકેસરિરુવાચ ।
ત્વત્તોઽન્યઃ શરણં નાસ્તિ ત્વમેવ મમ રક્ષકઃ ।
અતો મયિ કૃપાદૃષ્ટ્યા હનુમન્ રક્ષ માં સદા ॥ ૨૯॥

શ્રીમારીચ ઉવાચ ।
સદા પાપૌઘનિષ્ઠૂતં પાપેષુ હૃષ્ટમાનસમ્ ।
પાપાત્માનં મહાપાપં રક્ષ માં હનુમત્પ્રભો ॥ ૩૦॥

શ્રીતરુણ ઉવાચ ।
હનૂમદાજ્ઞયા યચ્ચ ભાવિ તદ્ભવતિ ધ્રુવમ્ ।
યદભાવિ ન તદ્ભાવિ વૃથા દેહપરિશ્રમઃ ॥ ૩૧॥

શ્રીગોમુખ ઉવાચ ।
અપરાધશતં નિત્યં કુર્વાણં માં નૃશંસકમ્ ।
ક્ષમસ્વ દાસબુધ્યા ત્વં હનુમન્ કરુણાનિધે ॥ ૩૨॥

શ્રીપનસ ઉવાચ ।
હનુમતો ન પરં પરમાર્થતો હનુમતો ન પરં પરમાર્થતઃ ।
ઇતિ વદામિ જનાન્ પરમાર્થતો ન હિ પરં ભવતોઽત્ર વિચક્ષણઃ ॥ ૩૩॥

શ્રીસુષેણ ઉવાચ ।
માતા હનૂમાંશ્ચ પિતા હનૂમાન્ ભ્રાતા હનૂમાન્ ભગિની હનૂમાન્ ।
વિદ્યા હનૂમાન્ દ્રવિણં હનૂમાન્ સ્વામી હનૂમાન્ સકલં હનૂમાન્ ॥ ૩૪॥

શ્રીહરિલોમ ઉવાચ ।
ઇતો હનૂમાન્ પરતો હનૂમાન્ યતો યતો યામિ તતો હનૂમાન્ ।
હનૂમતોઽન્યં નનુ નાસ્તિ કિઞ્ચિત્ તતો હનૂમાન્ તમહં પ્રપદ્યે ॥ ૩૫॥

શ્રીરઙ્ગ ઉવાચ ।

યદ્વર્ણપદમાત્રાભિઃ સહસોચ્ચારણો ભવેત્ ।
ક્ષમસ્વ તત્કૃપાદૃષ્ટ્યા હનૂમન્ પ્રણતોઽસ્મ્યહમ્ ॥ ૩૬॥

શ્રીવિધુષ્ટ ઉવાચ ॥

હનૂમાન્ રક્ષતુ જલે સ્થલે રક્ષતુ વાયુજઃ ।
અટવ્યાં વાયુપુત્રસ્તુ સર્વતઃ પાતુ મારુતિઃ ॥ ૩૭॥

ફલશ્રુતિઃ ।
ઇતીદં વાનરપ્રોક્તં સર્વપાપહરં વરમ્ ।
સર્વજ્ઞાનપ્રદં ચૈવ સર્વસૌભાગ્યવર્ધનમ્ ॥

ઇમાં વાનરગીતાં યે પઠન્તિ શ્રદ્ધયાન્વિતાઃ ।
પુત્રાન્ પૌત્રાંશ્ચ ભોગાંશ્ચ લભન્તે ક્ષણમાત્રતઃ ॥

ઐશ્વર્યં શાશ્વતં ચૈવ સુસ્થિરાઃ સમ્પદસ્તથા ।
આયુર્દીર્ઘં ચ કીર્તિં ચ પ્રાપ્નુવન્તિ ન સંશયઃ ॥

ઇહ ભુક્ત્વાખિલાન્ કામાન્ આઞ્જનેયપ્રસાદતઃ ।
ગચ્છન્ત્યન્તે પદં નિત્યં પુનરાવૃત્તિવર્જિતમ્ ॥

ઇતિ શ્રીપરાશરસંહિતાયાં પરાશરમૈત્રેયસંવાદે
શ્રીવાનરગીતા નામ ષટ્સપ્તતિતમઃ પટલઃ ॥

Encoded and proofread by
PSA EASWARAN psaeaswaran at gmail.coM
Earlier encoding by
ranav and Vrushali Tendulkar

*Shri Vanaragita from ParasharasamhitA*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*